श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्तषष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्तषष्टितमं दशकम् ॥

## भगवतस्तिरोधानादिवर्णनम्

स्फुरत्परानन्दरसात्मकेन
    त्वया समासादितभोगलीलाः।
असीममानन्दभरं प्रपन्ना
    महान्तमापुर्मदमम्बुजाक्ष्यः ॥ **67.1** ॥

निलीयतेऽसौ मयि मय्यमायं
    रमापतिर्विश्वमनोभिरामः।
इति स्म सर्वाः कलिताभिमाना
    निरीक्ष्य गोविन्द तिरोहितोऽभूः ॥ **67.2** ॥

राधाभिधां तावदजातगर्वा -
    मतिप्रियां गोपवधूं मुरारे।
भवानुपादाय गतो विदूरं
    तया सह स्वैरविहारकारी ॥ **67.3** ॥

तिरोहितेऽथ त्वयि जाततापाः
    समं समेताः कमलायताक्ष्यः।
वने वने त्वां परिमार्गयन्त्यो
    विषादमापुर्भगवन्नपारम् ॥ **67.4** ॥

हा चूत हा चम्पक कर्णिकार
    हा मल्लिके मालति बालवल्ल्यः।

किं वीक्षितो नो हृदयैकचोरः
    इत्यादि तास्त्वत्प्रवणा विलेपुः ॥ **67.5** ॥

निरीक्षितोऽयं सखि पङ्कजाक्षः
    पुरो ममेत्याकुलमालपन्ती ।
त्वां भावनाचक्षुषि वीक्ष्य काचित्
    तापं सखीनां द्विगुणीचकार ॥ **67.6** ॥

त्वदात्मिकास्ता यमुनातटान्ते
    तवानुचक्रुः किल चेष्टितानि ।
विचित्य भूयोऽपि तथैव मानात्
    त्वया विमुक्तां ददृशुश्च राधाम् ॥ **67.7** ॥

ततः समं ता विपिने समन्तात्
    तमोवतारावधि मार्गयन्त्यः ।
पुनर्विमिश्रा यमुनातटान्ते
    भृशं विलेपुश्च जगुर्गुणांस्ते ॥ **67.8** ॥

तथा व्यथासङ्कुलमानसानां
    व्रजाङ्गनानां करुणैकसिन्धो ।
जगत्त्रयीमोहनमोहनात्मा
    त्वं प्रादुरासीरयि मन्दहासी ॥ **67.9** ॥

सन्दिग्धसन्दर्शनमात्मकान्तं
    त्वां वीक्ष्य तन्व्यः सहसा तदानीम् ।
किं किं न चक्रुः प्रमदातिभारात्
    स त्वं गदात् पालय मारुतेश ॥ **67.10** ॥

॥ इति श्रीमन्नारायणीये सप्तषष्टितमं दशकं समाप्तम् ॥